© 2020 | International Journal of Scientific Research in Science and Technology
IJSRST | Volume 7 | Issue 2 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# अधिगन्तॄणां गुणाः

(Learner's characteristics)

Prof. N. Latha
Professor, Department of Education, National Sanskrit University, Tirupati.

सम्प्रतिकशिक्षा छात्रकेन्द्रितशिक्षा। शिक्षायाः उद्देश्यानि, व्यवस्थाः, विधयः इत्यादयः सर्वेऽपि इमे अंशाः छात्रकेन्द्रिताः एव विद्यन्ते । तादृशे छात्रे नैके गुणाः लक्षणानि च अपेक्षन्ते इति अर्वाचीनैः प्राचीनैश्च शिक्षाविद्भिः प्रोक्ताः ते च गुणाः प्रस्तोष्यन्ते अधुना।

Henry P. Smith महोदयस्य अनुसारम् अधिगमः नाम ज्ञानम्, अनुभवसम्पादनेन सापेक्षरूपेण शाश्वतव्यवहारपरिवर्तनम् भवति।

तदेव उच्यते अनुभवेन शिक्षणेन प्रशिक्षणेन जीवस्य व्यवहारे जायमानः प्रायः शाश्वतिपरिवर्तमेव अधिगमः इति।

यद्यपि स च अधिगमः सम्पादनीयः शिक्षकेण तथापि अधिगमः जायते अधिगन्तृषु । अतः अधिगन्तुः केचन संसिद्धतादयः केचन गुणाः भवेयुरेव। अन्यथा यः विषयम् आत्मसात् कर्तुं प्रयतते सः तं विषयं ग्रहीतुं समर्थो भवेत्।

अधिगमवातावरणेषु बालान् कक्ष्यावातावरणम् अत्यन्तं प्रभावयति । तेषां शारीरिक-मानसिक - बौद्धिक - आध्यात्मिक - क्षमतादीनां विकासः भवति।

**शास्त्रोक्ताः केचन अधिगन्तुः गुणाः**- तितिक्षा, श्रद्धा, उपरतिः, आत्मसंयमः, आत्मनिर्भरता, आत्मानुभूतिः, आत्मविश्वासः, आदर्शः, क्षमा, त्यागः, अतिथिसत्कारः, संस्कारः, दया, सत्यं, अहिंसा, परोपकारः, स्वावलम्बनम्, सहयोगः, सहानुभूतिः, विनयः, विवेकः इत्यादयः गुणाः प्राचीनकाले प्रोक्ताः। तदिदं क्रमशः निरूप्यते -

भगवद्गीतायां सात्विकादयः त्रयः गुणाः प्रोक्ताः । यथा सत्व-रजस्तमांसि श्रेष्ठाः व्यक्तित्त्वगुणाः भवन्ति।

भागवद्गीतायाम् अहिंसादयः गुणाः प्रोक्ताः यथा -

**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।**
**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ।।**

याज्ञवल्क्यस्मृतावपि अयमेव विषयः प्रोक्तः -

**अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।**
**दानं दमो दया शान्तिः सर्वेषां धर्मसाधनम् ।।** (याज्ञवल्क्यस्मृतिः 1.122)

**पञ्च यमाः**

सिद्धिसम्पादनावसरे अनिवार्याः गुणत्वेन पञ्च यमाः प्रोक्ताः पातञ्जलयोगदर्शने -

Received : 10 March 2020 | Accepted : 26 March 2020 | March-April-2020 [ 7 (2) : 659-660]

**अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहा:**

(पतञ्जलि:-योगदर्शनम्-साधनपाद:द्वि.अ.)

**धर्मलक्षणम् –**

धर्मस्य लक्षणाकथनावसरे कस्यापि विषयस्य धर्मस्य आचरणार्थं व्यक्ते इमे दश गुणा: अपेक्षन्ते –

**एवं धृतिः क्षमा दमोऽस्तेयं शौचं इन्द्रियनिग्रहः।**

**धीर्विद्या सत्यं अक्रोधो दशकं धर्मलक्षणम् ।। मनुस्मृतिः (6-92)**

सुभाषितकारेण अपि विद्यार्थिन: पञ्च गुणा: कथिता:। ते च यथा –

**काकचेष्टा बको ध्यानं, श्वाननिद्रा तथैव च ।**

**अल्पहारी गृहत्यागी, विद्यार्थी पंच लक्षणं ।।**

ज्ञानर्जनक्रमे च्छात्रस्य सानूकूलपरिवर्तनं कथं भवेत् इति कथयन् सुभाषितकार: वदति –

**विद्या ददाति विनयं विनयाद्याति पात्रताम्।**

**पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ।।**

अपि च सुखत्यागेनैव विद्यार्जनं भवति इति कथयति सुभाषितकार:। यथा –

**सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम् ।**

**सुखार्थी वा त्यजेत् विद्यां विद्यार्थी वा त्यजेत् सुखम् ।।**

**उपसंहार:** - इत्थं पूर्वेक्ता: गुणा: च्छात्रस्य अधिगन्तु: वा तत्तच्छास्त्रेषु प्रोक्ता: वस्तुत: अधिगन्तु: अनिवार्या: गुणा:। एतेषां गुणान् विहाय न वा विषयग्रहणं सम्यक् भवति न वा अधीत: विषय: आत्मसात् भवति। क्वचित् अधिगतोऽपि विषय: समाजहिताय न सम्भवति । अत: छात्रै: एतेषां गुणानाम् आधाने यत्नो विधेय: शिक्षकैरपि तस्मिन् मार्गे यतनीयम् ।

### उपयुक्तग्रन्थसूची


1. Ancient Indian Education, F.K.Keny, Cosmo Publications, Darya Ganj, New Delhi, 1997
2. Examination in Ancient India, S. Narain with forceword by Prof. G Ram Reddy, Chairman, UGC, Newdelhi
3. उदीयमान भारतीय समाज में शिक्षा, डा. रामपाल सिंह वर्म, के. सुधा, विनोद पुस्तक मंदिर, आगरा
4. पातञ्जलयोगदर्शनम्, चौखम्बा प्रकाशनम्, वारणाशी ।
5. भर्तृहरिनीतिशतकम्, भर्तृहरि:, चौखम्बा प्रकाशनम् ।